भारतस्वातन्त्र्यस्वर्णजयन्तीग्रन्थमाला – 33

50

# राजनीतिलीलामृतम्

## दीपकघोषः

राष्ट्रियसंस्कृतसंस्थानम्

# प्राक्कथनम्

*योऽनूचानस्स नो महान्* इत्युद्दिश्य संस्कृतसंरक्षणसंवर्धन–प्रचारप्रसारात्मकं स्वोद्देश्यं साधु निर्वहदिदं **राष्ट्रियसंस्कृतसंस्थानं** भारतस्वातन्त्र्यस्वर्णजयन्तीं विविधैश्शैक्षिकार्यक्रमैरायोजयदिति विज्ञाय समेषां विदुषां संस्कृतानुरागिणां च मनांस्यवश्यं मोमुद्येरन्।

प्राचीनशास्त्राणां संरक्षणे, संवर्धने, संस्कृताध्ययनपरम्पराया राष्ट्रियैकात्मतासंवर्धनशक्तेश्च प्रचारार्थं संस्थानेनानेन निरन्तरं विहितं सत्प्रयत्नं योगदानं च विद्वत्समवायस्सर्वथाभिनन्दतीति विश्वस्यते।

भारतस्वातन्त्र्यस्वर्णजयन्तीमभिलक्ष्य प्रवर्तितायां योजनायां राष्ट्रस्यास्य विभिन्नेषु प्रान्तेषु विद्योतमानैर्विद्वत्तल्लजैः नानाशास्त्राणि तत्र निहितानि वैज्ञानिकतत्त्वानि चाधिकृत्य विरचितानि ग्रन्थकुसुमानि सादरं सञ्चित्य सङ्ग्रथ्य च **भारत-स्वातन्त्र्य-स्वर्णजयन्ती-ग्रन्थमालात्वेन** तत्रभवतां समक्षमुपस्थाप्य महानानन्दस्सन्तोषश्चोपजायेते।

**राजनीतिलीलामृतम्** इति व्यङ्ग्यार्थसंवलितं काव्यरत्नं कलिकाता विश्वविद्यालयस्य संस्कृतविभागाध्यक्षचरैः प्रसिद्धैः कविभिः डॉ. दीपकघोष-महोदयैः प्रस्तुतं, यत्र हि भूमण्डले सर्वत्र स्वप्रभावातिशयं प्रदर्शयन्त्याः राजनीतिदेव्याः विविधाः साध्वसाधुलीलाविलासाः सम्यक् कविना वर्णिताः। काव्यामृतरसास्वादेनानेन रसिकानामानन्दो मनोमोदश्च स्याता-मित्याशास्यते।

**भारतस्वातन्त्र्यस्वर्ण-जयन्तीग्रन्थमालायै** एतादृशं काव्यरत्नं

निरीक्षमाणा कुरुषे स्वमास्यं
किञ्चित् स्मिताभं परितृप्तचित्ता ।।२७।।

अर्न्तहिताः क्व श्रमवृत्तिजीविन–
स्तवेन्द्रजालेन वदैन्द्रजालिके !
तवैव मन्त्रेण वदाद्य मन्त्रिणि !
गताः क्व प्रत्यागमनाय नैव ।।२८।।

प्रियेषु सौभाग्यफला हि चारुते–
ति संस्मरन्त्यः कृतचारुवेशाः।
सतीप्रिया लुप्तयथार्थबुद्धयो
दूराध्वनि प्रस्तरिताक्षिपाताः।।२६।।

वृत्तिच्युता वृत्तिगता भवन्ति
वृत्तौ स्थिता ये तु ततश्च्युतास्ते।
क्रीडाऽद्भुता क्रीडणकैस्तवैषा
शिल्पेऽथवा शिल्पिगता यदृच्छा ।।३०।।

वृत्तेश्च्युतानां हतभाग्यपुंसां
स्त्रीपुत्रकन्याः स्वजनाः प्रियाश्चेत्।
क्षुत्पीडिता घ्नन्ति ततः स्वमेव
हेतुस्त्वमेवेति न विस्मर त्वम् ।।३१।।




# राष्ट्रिय-संस्कृत-संस्थानम्

**Rashtriya Sanskrit Sansthan**

56 - 57, इन्स्टीट्यूशनल एरिया,

56-57, Institutional Area,

जनकपुरी, नई दिल्ली - 58

Janakpuri New Delhi-58